**माहाकुल** त्रि० महाकुले भवः अण् । महाकुलोद्भवे । खञ् माहाकुलीनोऽप्यत्र त्रि० ।

**माहात्म्य** न० महात्मनो भावः ष्यञ् । महिमनि महत्त्वे ।

**माहिष** न० महिष्या इदम् अण् ।१महिषीदुग्धादौ महिष-स्येदम् अण् । २तच्छृङ्गादौ त्रि० ।

**माहिषिक** पु० "महिषीत्युच्यते नारी या च स्याद् व्यभि-चारिणी । तां दुष्टां कामयति यः स वै माहिषिकः स्मृतः" कालीपु० उक्ते १व्यभिचारिणीपतौ "महिषी-त्युच्यते नार्या भगेनोपार्जितं धनम् । उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः" विष्णुपु० व्याख्यायां श्रीधरधृतवाक्योक्ते व्यभिचारिस्त्रिया २भगोपार्जितद्रव्यो जीविनि च । [पादिते सङ्करजातिभेदे अमरः ।

**माहिष्य** पु० महिष्यां भवः ष्यञ् । क्षत्रेण वैश्यायामुत्-

**माहेन्द्र** पु० महेन्द्रस्यायम् अण् । ज्योतिषोक्ते महेन्द्रसम्ब-न्धिनि १दण्डभेदे । २पूर्वस्यां दिशि ३इन्द्रपत्न्यां ३गवि च स्त्री राजनि० ङीप् । [स्त्रीगव्यां स्त्री अमरः ङीप् ।

**माहेय** पु०मह्या अपत्यम् मही+ढक् । १मङ्गले २नरकासुरे च

**माहेश्वर** त्रि० महेश्वरादधिगतम् ततः आगत अण् ।१महे-श्वरतः प्राप्ते सि०कौ०।२यवतिक्तायां स्त्री राजनि० ङीप् तस्येदम् अण् "माहेश्वरी वृषारूढा" इत्युक्ते ३मातृभेदे ४दुर्गामातृ स्त्री ङीप् ।

**मि** क्षेपे स्वा० उभ० सक० अनिट् । मिनोति मिनुते अमा-सीत् अमास्त । ड्वित् क्त्रि मप् च मित्रिमम् ।

अनु+व्याप्तिहेतुके परामर्शाधीनज्ञाने ।

उप+सादृश्यहेतुके ज्ञानभेदे ।

प्र+यथार्थज्ञाने ।

**मिच्छ** बाधे तुदा० पर० सक० सेट् । मिच्छति अमिच्छीत् ।

**मित** त्रि० मि मा-वा-क्त । १परिमिते, २शब्दिते ३क्षिप्ते च ।

**मितङ्गम** पुंस्त्री० मितं परिमितं यद्दु-गच्छति गम-खच् मुम् च । १गजे सि०कौ० स्त्रियां ङीष् । २परिमितगा-मिनि त्रि० स्त्रियां टाप् ।

**मितद्रु** पु० मितं द्रूनि द्रवति वा कु नि० । समुद्रे हेमच० ।

**मितम्पच** पु० मितं पचति पच-खच् मुम् च । १कृपणे अमरः । २परिमितपाचके त्रि० ।

**मिति** स्त्री मा-मि-वा क्तिन् । १ज्ञाने, २माने, ३अवच्छेदे, ४विक्षेपे च । ज्ञानमात्रस्य मितिमातृमेयविषयकत्वमिति गुरवः ।

**मि(त्र)त** न०मिद्यति स्निह्यति मिद-क्त । १स्नेहान्विते सुहृदि, राज्ञां विषयानन्तरितत्वपादितरस्मिन् २राजनि तयो-र्द्वयोरपि मध्यस्थत्वपस्य राज्यहरणरूपैककार्यकरत्वात् मित्रत्वम् । मि-त्र । एकतकारः ३सूर्ये पु० अमरः ४अर्कवृक्षे ।

**मित्त्रयु** पु० मित्त्रं याति या-कु । मित्रवत्सले हेमच० ।

**मिथ** बधे मेधायाञ्च सक० भ्वा० उभ० सेट् । मेथति-ते अमेथीत् अमेथिष्ट । ऋदित् चङि न ह्रस्वः । [अमरः ।

**मिथस्** अव्य० मिथ-असुन् । १रहसि, २अन्योन्यस्मिन्नित्यर्थे

**मिथि** पु० निमिराजपुत्रे विष्णुपु० ।

**मिथिला** स्त्री मिथि+अस्त्यर्थे लच् । स्वनामख्यातायां मिथि-राजधान्याम् । [ द्वितस्तृतीये राशौ च ।

**मिथुन** न० मिथ—उनन् किच्च । १स्त्रीपुंसयोर्युग्मे २मेषा-

**मिथ्या** अव्य० मिथ—क्यप् । अयथार्थे असत्ये ।

**मिथ्यादृष्टि** स्त्री मिथ्या-सफलस्यापि अफलत्वेन दृष्टिः । नास्तिकतायां सफलस्यापि वैदिककर्मणो निष्फलत्वज्ञाने अमरः । [ क्षेपे करणे ल्युट् । शपथे भरतः ।

**मिथ्यानिरसन** न० मिथ्या निरस्यतेऽनेन निर्+अस—

**मिथ्याभियोग** पु० मिथ्याभूतेनासत्येनाभियोगः राज्ञोऽन्तिके वेदनम् अभि-युज-घञ् । शतं मे धारयतीत्यसत्यसङ्ख्या राज्ञोऽन्तिके अभियोगे अमरः ।

**मिथ्याभिशंसन** न० मिथ्याभूतेनासत्येनाभिशंसनम् अप-वादः "त्वया स्वर्णमपहृतम्" इत्यपवादकथने ।

**मिथ्याभिशाप** पु० मिथ्याभूतेनासत्येनाभिशापोऽपवादः । मिथ्यापवादे । [ अतद्गति तद्वत्त्वेन ज्ञाने ।

**मिथ्यामति** स्त्री मिथ्याभूतस्य मतिः मन-क्तिन् । भ्रान्तौ-

**मिथ्योत्तर** न० कर्म० । व्यवहारे "मिथ्यैतत् नाभिजानामि तदा तत्र न सन्निधिः । अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधम्" इत्युक्तप्रकारे, उत्तरभेदे, ("मिथ्यो-त्तरे पूर्ववादे") इति स्मृतिः । [ऋदित् चङि न ह्रस्वः ।

**मिद** बाधे मेधायाञ्च भ्वा० उ०सक०सेट् । मेदति-ते अमेदीत्

**मिद** स्नेहे भ्वा० आ० लुङि प० अक० सेट् । मेदते इरित् अमिदत् आदित् भावादौ क्ते मिन्नं मेदितम् ।

**मिद** स्नेहे वा चु० उभ०पक्षे भ्वा०अक०सेट् इदित् । मिन्द-यति अमिन्दत्-त । पक्षे मिन्दति अमिन्दीत् ।

**मिद** स्नेहे दि० पर० सक० सेट् । मेद्यति-ते इरित् अमिदत् अमेदीत् । आदित् क्त मेदितं भिन्नम् ।

**मिद** स्नेहे चु० उभ० सक० सेट् । मेदयति-ते अमीमिदत्-त

**मिम्मिल** त्रि० सानुनासिकशब्दकारके १रोगभेदे २तद्युते